# Shri Parameshvara Stotram 2

# શ્રીપરમેશ્વરસ્તોત્રમ્ ૨

## Document Information

Text title : Shri Parameshvara Stotram 2

File name : parameshvarastotram2.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : Skanda Purana

Latest update : April 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીપરમેશ્વરસ્તોત્રમ્ ૨

નમઃ કનકલિઙ્ગાય વેદલિઙ્ગાય વૈ નમઃ ।
નમઃ પરમ લિઙ્ગાય વ્યોમલિઙ્ગાય વૈ નમઃ ॥ ૧॥

નમસ્સહસ્રલિઙ્ગાય વહ્નિલિઙ્ગાય વૈ નમઃ ।
નમઃ પુરાણલિઙ્ગાય શ્રુતિલિઙ્ગાય વૈ નમઃ ॥ ૨॥

નમઃ પાતાલલિઙ્ગાય બ્રહ્મલિઙ્ગાય વૈ નમઃ ।
નમો રહસ્યલિઙ્ગાય સપ્તદ્વીપોર્ધ્વલિઙ્ગિને ॥ ૩॥

નમસ્સર્વાત્મલિઙ્ગાય સર્વલોકાઙ્ગલિઙ્ગિને ।
નમસ્ત્વવ્યક્તલિઙ્ગાય બુદ્ધિલિઙ્ગાય વૈ નમઃ ૪॥

નમોઽહઙ્કારલિઙ્ગાય ભૂતલિઙ્ગાય વૈ નમઃ
નમ ઇન્દ્રિયલિઙ્ગાય નમસ્તન્માત્રલિઙ્ગિને ॥ ૫॥

નમઃ પુરુષલિઙ્ગાય ભાવલિઙ્ગાય વૈ નમઃ
નમો રજોર્ધ્વલિઙ્ગાય સત્ત્વલિઙ્ગાય વૈ નમઃ ॥ ૬॥

નમસ્તે ભવલિઙ્ગાય નમસ્ત્રૈગુણ્યલિઙ્ગિને ।
નમોઽનાગતલિઙ્ગાય તેજોલિઙ્ગાય વૈ નમઃ ॥ ૭॥

નમો વાય્વર્ધલિઙ્ગાય શ્રુતિલિઙ્ગાય વૈ નમઃ ।
નમસ્તે ધર્મલિઙ્ગાય સામલિઙ્ગાય વૈ નમઃ ॥ ૮॥

નમો યજ્ઞાઙ્ગલિઙ્ગાય યજ્ઞલિઙ્ગાય વૈ નમઃ ।
નમસ્તે તત્ત્વલિઙ્ગાય દેવાનુગતલિઙ્ગિને ॥ ૯॥

દિશ નઃ પરમં યોગમપત્યં મત્સમં તથા ।
બ્રહ્મ ચૈવાક્ષયં દેવ શમં ચૈવ પરં વિભો ।
અક્ષયત્વં ચ વંશસ્ય ધર્મે ચ મતિમક્ષયામ્ ॥ ૧૦॥

અગ્નિઃ - વસિષ્ઠેન સ્તુતશ્શમ્ભુસ્તુષ્ટશ્શ્રીપર્વતે પુરા ।

વસિષ્ઠાય વરં દત્વા તત્રૈવાન્તરધિયત ॥ ૧૧॥

(સ્કન્દપુરાણે પઞ્ચદશમોઽધ્યાયઃ)

ઇતિ શ્રીસ્કાન્દે શ્રીવસિષ્ઠકૃતં શ્રીપરમેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Shri Parameshvara Stotram 2*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*